दिमेषादिकेंद्रः तदानीमुत्तरविक्षेपः। तुलादिकेंद्रस्तदादक्षिणइत्यर्थः। मंडलयोगखंडात्मानैक्यार्धात्तद्वशेनविक्षेपरहितेनेचत्
छन्नंभवेत्। ग्रासस्यात्। ननुमानैक्यार्धक्षेपोनितरविचंद्रयोर्ग्रहणमितिनसंगच्छते। अत्रोनितंतत्रैवग्रहणंन्यायेतत्रापि
ग्रात्स्यात्तद्वास्यविद्यमानत्वात्तन्नंतग्राहकांशास्यविद्यमानत्वात्। उच्यते। मानैक्यार्धसमविक्षेपोयदाभवतियादान्यूनंत
दाग्रहणंभवति। न्यूनाधिकत्वेकिंचिदपेक्ष्यवक्तव्यंतस्मात्तावन्मात्रमेवमानैक्यार्धोनरसमश्चविक्षेपः तदानीसर्वग्रासंग्रात्य
चतुर्थांशासहितग्राहकार्धसमश्चविक्षेपः तदानीपादन्यासः ग्रात्यचतुर्थांशोनग्राहकार्धसमश्चविक्षेपः तदात्रिपादग्रासः
। अत्रयुक्तिर्विपश्चितप्रष्टव्याः अथसर्वग्रासज्ञानोपायंग्रहणभावज्ञानोपायंचाह ग्रात्यस्यबिंबादधिकं
यदास्यात्छन्नतदानीग्रहणंसमग्रं॥ यदापुनर्मानदलेक्यमूनंविक्षेपतोनग्रहणंतदास्यात् ५ ग्रात्यस्येति। ग्रासस्यसूर्यग्र
णसूर्यबिंबार्द्धचंद्रग्रहणेचंद्रबिंबार्द्धछन्नग्रासलिप्तार्यदाधिकास्यातदानीग्रहणंसमग्रोसंपूर्णं। यदाविक्षेपतः मानैक्यदलंमानैक्या
र्धं। ऊनंतदाग्रहणंनस्यात्॥ अथास्तित्यर्धमर्दार्धानयनमाह ग्रात्यार्धेनग्रहकार्धयुतोनेस्वघ्नेताभ्यांक्षेपवर्गवि
शाध्यं॥ मूलंषष्टिघ्नंवियोगेनगत्योर्भक्तेस्फुटं। स्थित्यर्धमर्द्धार्धनाड्यः ६ ग्रात्यार्धेन। सूर्यग्रहणेसूर्यबिंबार्धेन। चंद्रग्रहे
चंद्रबिंबार्धेन। ग्राहकार्धं। चंद्रग्रहणेतमोबिंबार्धं। सूर्यग्रहणेचंद्रबिंबार्धंयुतोनेसहितरहितेस्वघ्नेऊनेवर्गितताभ्यांक्षेपवर्गवि

शोध्यमूलेषदाकृतेषष्टि६० घ्नेवियोगनगत्योर्मक्रेगत्यंतरेणभाजितेयमाक्रमंमध्यास्थित्यर्धनाड्यः स्युः।अथवामानैक्यार्धंद्विधा
कृत्वाएकस्मिन्विक्षेपसंयुज्यजन्यत्रत्यत्क्रांजन्योन्यंगुणइत्यामूलीकृत्यएतत्षष्टि६०घ्नंगत्यंतरेणभाजितंस्थित्यर्धनाड्यःस्यु
।यात्यार्धीनित्याहकार्धंद्विधाकृत्वाएकस्मिन्विक्षेपसंयुज्यजन्य०त्रत्यत्क्रांजन्योन्यंगुणइत्वामूलीकृत्यषष्टि६०घ्नंगत्यंत
रेणभाजितंमर्दार्धनाड्यःस्युः।अथवाग्रासार्धहीननीहारमानैक्य।धर्मूर्दार्धपदमात्तंगत्यंतरेणभाजितंस्थित्यर्धनाड्यःस्युः।
भवेत्।मानैक्यार्धविक्षेपगुणितंग्रासलिप्तिवर्गसहितंमूलीकृतंषष्टि६०घ्नंगुणितंगत्यंतरेणभाजितंस्थित्यर्धनाड्यःस्युः।
अथस्फुटस्पर्शास्थित्यर्धमोक्षास्थित्यर्धस्पर्शविमर्दार्धमोक्षमर्दार्धगणनप्रकारंचाह स्थित्यर्धमर्दार्धजनाडिकाह
तामुक्तिर्विभक्तारवरसैःकलादिकं आदौस्पर्शयोर्त्वोधनमर्कचंद्रयोःपातेऽन्यथास्यादसकृत्स्वकर्मणा ७ स्थित्यर्ध
ति।मुक्तिःस्वस्वगतिः।स्थित्यर्धमर्दार्धजनाडिकाहता।मध्यास्थित्यर्धनाडिकाहतारवरसैः।षष्ट्या६०विभक्तालब्धंकलादि
कं।आदौस्पर्शकालेऽर्कचंद्रयोःक्षयःऋणं।अंत्येमोक्षकालेधनंकार्यं।पातेन्यथास्यात्।राहुगतिः स्थित्यर्धमर्दार्धजना
डिकाहतापष्ट्या६०।विभक्तालब्धंकलादिकंआदौस्पर्शेधनंमोक्षेऋणंकार्यं।असकृत्०अनेकप्रकारः।तत्फलंज्ञानेयं।स्प
र्शमोक्षाभिप्रायः।तद्ग्रासंस्कृतचंद्रात्पूर्ववद्विक्षेपमानीयविक्षेपवर्गमानैक्यार्धवर्गात्यत्क्रामूलीकृत्यतत्षष्टि६०गुणितंव्यर्क
दृग्गत्याभक्तंस्थित्यर्धनाड्यः।एवंपुनःपुनःकार्यैःयदापूर्वानीतास्थित्यर्धनाड्यःइदानीमानीतास्थित्यर्धनाड्यःसमास्युःत
दास्थित्यर्धनाड्योभवंति।एवंमर्दार्धनाड्यानयनेपिकार्यः।अथवाविक्षेपमधीकृतंचेत्तदाविनाडिकाभवंति।तद्विनाडिकाः
कोटिरार्शोस्थितवान्चेत्तमध्यास्थित्यर्धनाड्यामूर्णंकार्यं।एवंकृतेस्फुटास्थित्यर्धनाड्यःस्युः।मध्यास्थित्यर्धनाड्योपूर्वानी
तविनाडीयुतामोक्षास्थित्यर्धंभवति।मुजगार्शोस्थितवांश्चेत्पूर्वोक्तस्यैवपरीत्यंविक्षेपंद्विगुणीकृत्यमानैक्यार्धविक्षेपयोरंतरे
णगुणइत्वाजांतरवर्गंचैक्ययोर्वर्गांतरंस्यात्।अथवामानैक्यार्धंविक्षेपयोरंतरेणगुणइत्वाजांतरविक्षेपमानैक्यार्धंचगुणइत्वा
क्ययोर्योगोवर्गांतरंस्यात्।स्पर्शास्थित्यर्धगणने।मध्यास्थित्यर्धंपंचगुणितंविनाडीभवति। साकोटिपंचतत्स्थित्यर्धयो

405
1918

ज्या।मासकालेषज्यां।मुजपैर्द्वेपरीत्यं अथस्पर्शमध्यमोक्षांतपुण्यकालदर्शनकालानाह तिथ्यंतम्
नमधिकंस्थितिखंडकाभ्यांग्रासमोक्षसमयंक्रमशोवदंति॥स्थित्यर्धयोरिहयुतिःखलुपुण्यकालोमर्दार्धयो
र्युतिरदर्शनकालइंदोः॥९॥ ॥तिथ्यंतमिति।तिथ्यंतमूनमधिकं।स्थितिखंडकाभ्यांपर्वांतद्विधाकृत्वाएक
स्मिन्स्फुटस्पर्शास्थित्यर्धरहितेसतिमुक्त्यस्पर्शकालः।अपरस्मिन्स्फुटमोक्षास्थित्यर्धसहितेसतिमुक्त्यमोक्षकाल
स्यात्।एवंग्रग्रासमोक्षसमयंक्रमशोवदंति।सनइतिशेषः।स्थित्यर्धयोरिहयुतिःखलुपुण्यकालः।स्पर्शादा ग्रयमो
क्षपर्यंतंग्रहणकालइत्यर्थः।मर्दार्धसंयुतिरदर्शनकालइंदोः।स्फुटस्पर्शमोक्षमर्दार्धयोर्योगः।अदर्शनकाल
इंदोः।अदृश्यकालइत्यर्थः॥अथमध्यमकालनिमीलनोन्मीलनकालावाह॥ ॥तिथ्यंतकालोग्रहणस्यमध्य
माद्यनहीनःसहितोत्यजेन॥विमर्दखंडेनपृथक्क्रमेणस्यान्मीलनोन्मीलनकालइंदोः॥१०॥ ॥तिथ्यंतकाल
इति।तिथ्यंतकालः।पर्वांतकालएवग्रहणस्यमध्यकालः।आद्येनहीनःसहितोत्यजेन।विमर्दखंडेन।क्रमात्।पर्वो
तद्विधाकृत्वाएकस्यस्पर्शमर्दार्धेनानितः।अपरमोक्षमर्दार्धेनसंयुज्यनिमीलनकालः।उन्मीलनकालश्चस्यात्॥ ॥
॥अथअमीष्टग्रासानयनार्थंतत्साधनभूतभुजकोटिकर्णानयनमाह॥ ॥अमीष्टहीनास्थितिखंडनिघ्नंगत्यंत
रंषष्टिहृतंभुजस्यात्॥तत्कालिकंहारिपुरेवकोटिस्तद्वर्गयोगात्पदमिष्टकर्णः॥११॥ ॥अमीष्टेति।अमीष्टहीं
नास्थितिखंडनिघ्नंगत्यंतरं।अमीष्टघटिकोनस्फुटस्पर्शास्थित्यर्धंगत्यंतरगुणितंषष्टि६०हृतंभुजास्यात्।तत्कालि
कंदोरिवाकोटिः।पंक्तोशोध्यः।अमीष्टोनास्थित्यर्धगुणितगतिःषष्टि६०हृतालब्धंलिप्तादितत्समकलाचंद्रेत्यजेत्
तस्मादिंदोर्विक्षेपमानीय।तद्विक्षेपवर्गमानैक्यार्धवर्गायांतरपदात्पूर्ववात्स्थित्यर्धमानीयंतादृशास्थित्यर्धेअमी
ष्टघटिकोनंकृत्वातद्गत्यागुणइत्वाषष्ट्याविभजेत्।तत्कलादि।तत्समकलाचंद्रेसंयुज्य।तस्माद्विक्षेपादिस्थित्यर्धो
तंपर्ववदानयेत्।यदापर्वानितास्थित्यर्धंपश्चादानीतास्थित्यर्धंचसमंस्यात्तदातदमीष्टघटिकोनंगत्यंतरगुणितं

षष्टि ६० हृतंचेनदाइष्टभुजस्यात्। तत्कालगतविक्षेपएवकोटिः। तयोर्वर्गयोर्योगेपदीकृतेकर्णस्यात्। तत्कर्णे। मानैक्यार्ध
मिष्टमोक्षयास्यात्। एतेभुजकोटिकर्णाः शुद्ध्यमोक्षादारभ्यगुणानीयाइत्यर्थः। अत्रायंभावः। आनीष्टकघटिकोमोक्षास्त्यर्धा
वशेषितः भुजकोटिकर्णाः एकघटिकोनशुद्धमोक्षकालस्युः। एवंहिघटिकोनमोक्षास्त्यर्धावशेषतद्भुजकोटिकर्णाः घटि
कोनशुद्धमोक्षकालस्युः। एवंसर्वत्र। अथवामोक्षस्फुटचंद्रानीष्टमोक्षास्त्यर्धगुणितगतिलिप्तिसहितसमकक्षाचं
द्रयोः शुद्धमोक्षकालस्यशुद्धमोक्षास्त्यर्धगुणितगत्यंतरषष्टि ६० हृतंभुजा। तत्कालिकेषुरवकोटिः मानैक्यार्धकर्णः
पूर्ववत्गुणनीयः॥ ॥अथनिमीलनोन्मीलनयोर्भुजाकोटिकर्णानाह॥ ॥गत्यंतरमर्ददलाहृतेचंद्राग्वद्वि
धेयाभुजकोटिकर्णाः॥पिधानसंदर्शनकालजास्युर्ग्रासोविकर्णस्तनुरंडयोगः॥११॥ ॥गत्यंतरेति। पिधानसंदर्श
नकालजस्यनिमीलनोन्मीलनकालस्यमर्ददलाहृतेगत्यंतरेद्विधाकृत्वाषष्टया ६० तेनक्रांतिस्पर्शमोक्षभुजास्यांतांतत्का
लविक्षेपोकोटी। तद्वर्गयोगात्यदइष्टकर्णोतादृक्कर्णोनमानैक्यार्धग्रासलिप्तिः सार्चंद्रबिंबप्रमाणसदृशीग्रासोविकर्णस्त
नुरंडयोगः। विकर्णस्तनुरंडयोगइग्रासः॥ ॥अथइष्टग्रासादिष्टकालनयनमाह॥ ॥इष्टग्रासेनोनमानार्ध
योगस्वघ्नेमूलंक्षेपवर्गोनितेयत्॥तत्स्पष्टघ्नंव्यर्कगत्याविभक्तंस्वास्त्यर्धाद्बुध्यमिष्टस्तुकालः॥१२॥ ॥इष्टति
इष्टग्रासोनमानार्धयोगे। इष्टग्रासोनमानार्धयोगः। स्वघ्ने। वर्गीकृतः। क्षेपवर्गोनितं। विक्षेपवर्गशोधितः। मूलं। मू
लीकृतः। तत्। षष्टि ६० घ्नं। व्यर्कगत्याविभक्तंस्वास्त्यर्धात्तत्कालास्त्यर्धात्तद्युतोधमिष्टकालस्यात्॥ ॥अथा
क्षवलनमाह॥ ॥स्पर्शादिकाले। त्वनज्याकाभिरक्षप्रभासंगुणिताविभक्ता॥निजाक्षकर्णेनफलंस्वचापंयाम्योत्त
रंपश्चिमपूर्वयोस्यात्॥१३॥ ॥स्पर्शादिति। स्पर्शादिकालेत्थंनज्यकाभिः। स्पर्शकालंज्ञात्वा॥रात्र्यर्धदिनार्धज्ञात्वा
। स्पर्शादिकालदिनार्धयारंतरंभवनतः। तत्यषष्ट्यूणितस्यउक्रमजीवानयेत्। तयाजाक्षप्रभासंगुणितास्वदेशविषु
वच्छायागुणितानिजाक्षकर्णेनभक्तानिजविषुवत्कर्णेभक्ताफलस्यचापंज्यांविशोध्येत्यादिनाधनुरानयेत्। यामोत्तरप

श्चिमपूर्वयोस्यात्। प्राक्कपालेचेत्स्वनुरुत्तरं। पश्चात्रिज्याम्यं। दक्षिणं। इदमक्षवलनमित्युच्यते। अथयाज्ञाज्यानतोक्र
मज्यागुणितानिज्याविभक्तास्वापीकृतंचेदक्षवलनंभवति॥ अथायनवलनमाह ग्रात्यात्सत्रिगृहाद्वि
लोमविधिनादोर्ज्याविधेयाततः प्राग्वक्रांतिरसोग्रहत्रययुतस्येदोर्दिशास्यादिह योगोपक्रमचापयोः समदिशोः
कार्योवियोगोन्यथातज्जीवदत्तद्गुलानिवलनस्येत्यमवंतिस्फुटं १४ ग्रात्यादिति। ग्रात्यात्सत्रिगृहात्।
सूर्यग्रहणेसूर्यात्। चंद्रग्रहणेचंद्रात्। सायनत्रिराशि ३ सहितात्। केंद्रंज्ञात्वा। भुजामानीयतस्योक्रमजीवाकार्या
ततः प्राग्वक्रांतिरसोपूर्ववत्ग्रहस्यदोर्ज्यत्यादिनाक्रांतिमानयेत्। ग्रहत्रययुतस्येदोर्दिशास्यादिह। इहशास्त्रेराशि
त्रययुतस्यादिकूसेवबलनदिकूयोगोपक्रमचापयोः समदिशोः कार्योवियोगोन्यथा। समगोलयोरपक्रमचापयोः
अयनास्यवलनयोर्योगः कार्यः। भिन्नदिशोस्तयोर्वियोगः कार्यः। तज्याएवंकृतस्यज्यामानीयतेद ४ त्तेगुलादिष
लनस्येत्यमवंतिस्फुटं। सार्चतुर्भिर्भक्तेचेल्लब्धानिवलनांगुलानिस्युः। अथवाकेवलात्साधनंचंद्रात्ग्रहस्यदोर्ज्येत्या
दिनाक्रांतिमानीयपरमक्रांतेर्मविवरकादूनंचेत्तज्जयनक्रांतिर्भवति अथबिंबादीनामंगुलानयनमाह
स्वाब्ध्यंशयुक्तंदिनमुन्नताढ्यं दिनार्धभक्तंचत्तिथिस्तयासा मानार्धमानैक्यदलेषुकर्णदोः कोट्यःसंतितदंगुला
नि १५ स्वाब्ध्यंशेति। स्वाब्ध्यंशयुक्तंदिने। सूर्यग्रहणेदिवाप्रमाणं। चंद्रग्रहणेरात्रिप्रमाणं। स्वचतुर्थांशसहितं
उन्नताढ्यं प्राक्कपालइष्टनाडीसहितं। पश्चात्कपालइष्टनाडीरहितदिवाप्रमाणेनसहितंदिवाप्रमाणं रात्रिप्रमाणं
उन्नतसहितंदिनार्धभक्तंचत्तिथिः सार्यंअहर्दलेनचंद्रारात्रिदलेनभक्तस्यफलस्यत्तिथिरितिसंज्ञा। अथवादिनार्ध
भक्तोन्नतसार्धद्व्येसहितंचेत्तत्तिथिस्यात्। तयात्तिथ्यासामानार्धमानैक्यदलेषुकर्णदोः कोट्यसंतितदंगुलानि। मा
नैक्यार्धचंद्रसूर्यबिंबविक्षेपभुजाकर्णतमोबिंबग्रासलिप्तास्तात्कालिकास्तत्कालत्तिथ्यासाजिताश्चेलब्धानितदंगु
लानिभवंति अथपंचभिःश्लोकैः परिलेखनप्रकारमाह आदौव्यासगुणांगुलैःपरिमितेमानैक्य

खंडांगुलैः पश्चाद्धात्यदलांगुलैश्चवलयंसंसाधितासंलिखेत्। आद्यप्राक्पियथादिशिस्वचलनेकेंद्रोर्विमोक्षादिजेतत्प्राग्वि
शिकमोक्षिकेन्यदिशिजेयावत्कर्मात्मापयेत् १६ आदावित्यादिना। आदौद्योमगुणांगुलैः परिमितं। सुसाधि
तायामवनोपेठपलकेत्राग्रयमतः। त्रिंशदंगुलपरिमितसूत्रेणएकरज्जुंलिखेत्। पश्चात्तदंतः मानैक्यखंडांगुलैः तत्का
लमानैक्यार्धप्रमाणेनएकंरज्जुंलिखेत्। ग्यात्यदलांगुलैश्चतदंतः सूर्यग्रहणेतत्कालसूर्यबिंबार्धांगुलप्रमाणेनचंद्रग्रहणे
चंद्रबिंबार्धांगुलप्रमाणेसूत्रेणयकंरज्जुंलिखेत्। संसाधितासंरज्जुनाक्षेत्रयणंपूर्वापरदक्षिणोत्तररेखाः सम्यक्सा
धयेत्। तदनंतरमाद्यरज्जुतेत्रिंशदंगुलपरिमितेत्राक्कपालेयथादिशंदक्षिणंवलनंचेन्मध्येरेखायादक्षिणभागे। उत्तर
वलनंचेद्रेखाउत्तरभागेतत्कालस्ववलनांगुलानिज्यावत्प्रसारयेत्। तत्रबिंदुन्यस्यतस्मादर्कसूत्रंरज्जुमध्यबिंदुप्रवे
शयेत्। रविचंद्रयोः प्राक्कपालेमोक्षुवलनंस्पर्शवलनंचयथाक्रमंप्रसादयेदित्यर्थः। पश्चात्कपालेज्जुरज्जुतेपूर्वापररे
खायास्तत्कालिकवलनांगुलानिदिग्वैपरीत्येनज्यावत्प्रसारयेत्। तत्ररविचंद्रयोः स्पर्शवलनंमोक्षवलनंचयथाक्रमंप्र
सारयेदित्यर्थः अथविक्षेपांगुललेखानयनमाह शीलीमुखाख्यातककुप्प्रदेशोयाम्याच्चसोम्याच्चसमा
न्यकाष्ठे मध्यंनयेत्साग्निमपूर्वकाष्ठेतिग्मद्युतेश्चंद्रमसोन्यथास्यात् १७ शीलीमुखाख्येति। ककुप्प्रदेशो। दिक्प्रदे
शे। याम्याच्चसोम्याच्चसमानकाष्ठे। सम्यक्साधितदक्षिणोत्तररेखायांतिग्मद्युतेः सूर्यस्यापाग्निमपूर्वदेशेलिखेच्छीमुख
राख्यः विक्षेपसंज्ञामध्यंनयेत्। मानैक्यार्धरज्जुंतंयथादिशंनयेत्। चंद्रमसः चंद्रमस्यजंन्ययादिग्वैपरीत्येननयेत्
अथविक्षेपलेखनपूर्वापवदति इतिद्वितीयेवलनाग्रकेंद्रस्थसूत्रचिन्हात्स्वमांत्यबाणो केंद्रान्यसन्मध्यश
रंचमध्यः केंद्रोस्वकीयान्यदिशिक्रमेण १८ इत्तइति। द्वितीयेरज्जुतेमानैक्यार्धरज्जुतेवलनाग्रकेंद्रस्थसूत्रचि
न्हात्स्वमांत्यबाणो। यस्मिन्प्रदेशेवलनरेखास्पृशतिनास्मिन्प्रदेशेबिंदुन्यसेत्। तस्मात्सूर्यस्यदक्षिणोत्तरस्पर्शमोक्ष
विक्षेपांगुलानियथादिशान्यसेत्। चंद्रस्यस्पर्शमोक्षविक्षेपांगुलानिदिग्वैपरीत्येननयेत्। तत्रबिंदुन्यस्यतस्मादे

207
1918

र्कसूत्रंमध्यबिंदुप्रवेशयेत्। तद्भात्यरज्ज्वग्रयत्रस्पृशतितत्रस्पर्शमोक्षौवेदत्। मध्यवलनंचसूर्यस्याद्यरज्ज्वादक्षिणोत्तररेख
याविक्षेपवलनांगुलयोरकदिक्कुंदक्षिणविक्षेपस्त्रेदक्षिणरेखायाः पश्चात्सागेवलनांगुलप्रसादयेत्। उत्तरविक्षेप
स्त्रेदुत्तररेखायाः पश्चात्सागेवलनांगुलंप्रसादयेत्। विक्षेपवलनयोर्भिन्नदिक्कुंदक्षिणविक्षेपस्त्रेदक्षिणरेखायाः प्रा
ग्भागेबलनांगुलंप्रसादयेत्। उत्तरविक्षेपस्त्रेदुत्तररेखायाः प्राग्भागेनयं। चंद्रस्यतुविक्षेपवलनयोरकदिक्कुंदक्षिणविक्षे
पस्त्रेदुत्तररेखायाः प्राग्भागेवलनप्रसारयेत्। उत्तरविक्षेपस्त्रेदक्षिणरेखायाः प्राग्वलनंप्रसारयेत्। भिन्नदिक्कुंतुद
क्षिणविक्षेपस्त्रेदुत्तररेखायाः पश्चात्तदेशेउत्तरविक्षेपस्त्रेदक्षिणरेखायाः पश्चात्तत्रेदशेन्यसेदित्यर्थः। तत्रवलनाग्रे
बिंदुन्यस्यतस्मादर्कसूत्रंमध्यबिंदुप्रवेशयेत्। मध्यबिंदोः सकाशान्मध्यवलनविक्षेपवलनमार्गेणसूर्यस्ययथादि
शंप्रसारयेत्। चंद्रस्यदिग्वैपरीत्येनमध्यविक्षेपवलनमार्गेप्रसारयेत्। तदंतेबिंदुन्यसेत् अथस्पर्शमोक्षदिङ्नि
र्णयप्रासंसंस्थानमाह ग्रात्यरज्ज्वग्रयबाणाग्रतः खंडितेग्राहकार्धप्रमाणेनसूर्येणच स्पर्शमोक्षौभवेतांदि
ग्गोलर्क्षयंतमध्यमग्रासंसंस्थानमाशातः १९ ग्रात्येति। ग्रात्यरज्ज्वग्रयबाणाग्रतः। विक्षेपाग्रतः। ज्ञाणाग्रबिंदोः
सकाशाद्ग्राहकार्धप्रमाणेनसूत्रेणछादकार्धप्रमाणेनसूत्रेणखंडितेलिखेत्तसतिदिशोः दक्षिणोत्तरगोलयोस्प
र्शमोक्षौभवेताः। मध्यमग्रासंसंस्थानमाकाशारः। मध्यग्रासमाह। अंबरात्संलक्ष्यज्ञेयथामध्यविक्षेपाद्बिंदोः साका
शात्। तात्कालिकग्राहकार्धप्रमाणसूत्रेणरज्जुंलिखेत्। तदग्रंयद्यग्रात्यरज्ज्वग्रमतिक्रामतीतदासंपूर्णग्रहणं। य
द्ग्रात्यरज्ज्वग्रांतर्गच्छतितदानुपातनः ग्रहणंज्ञेयं अथइष्टग्रासलेखानयनमाह ग्रग्रासेबाहुरिंदोः स्व
लनककुभिप्राचिपश्चाच्चमोक्षकेंद्रात्पूर्णान्यथास्यात्त्वदिशिदिनपरः कोटिरिंदोर्भुजाग्रात्। वेस्तामध्यात्सौर्यास्फुतिमनृ
जुगतांकोटिकर्णाग्रयोगादिष्टग्रासादिसिध्येसुमतिरनुलिखेद्ग्राहकार्धेनरज्जुं २० ग्रग्रासइति। ग्रग्रासस्पर्शितां
विधुनंस्पर्शग्रासबाहुरिंदोः स्ववलनककुभिप्राचिचंद्रस्यप्राग्भागेवलनमार्गेणमध्यबिंदोः साकाशांतात्कालिकभुजा

परिमितिसूत्रंनयेत्। तदंतेबिंदुन्यस्यतस्मादिग्विपरीतेनतात्कालिककर्णांगुलंन्यसेत्। यत्रकोटिकर्णाग्रयोगतः तत्रबिंदुन्यस्यतस्मात्कालिकग्राह्यार्धप्रमाणसूत्रेणरज्जुंतोलिखेत्तदग्रंशून्यरज्जुंतेयावत्सविशतितावद्ग्रासः। एवंसर्वत्रापी ष्टग्रासोत्पत्तिः। सूर्यस्यतुकोटिर्ग्रयादिशांनयः। इतिविशेषः। मोक्षेतुस्वबलनमार्गेणमध्यबिंदोस्तत्कालेभुजाग्रश्चान्त्रा गबलनमार्गेणनयेदितिविशेषः। एवंसर्वत्रसुमतिनालिखितेमतिरिष्टग्रासादिसिद्धिस्यात् एतत्परिलेखनंगो प्यं। तदुक्तंसूर्यसिद्धांते रहस्यमेतद्दत्वानानंदेयंयस्यकस्यचित् सुपरीक्षितशिष्यायादातव्यंज्ञानमुत्तमं अथ एकरज्जुपरिलेखनमप्याह। तत्रकथं। सुसाधितायामवनौ। तन्मध्येबिंदुन्यस्यतद्बिंदुतः ग्राह्यार्धप्रमाणसूत्रेणएकरज्जुंतोलिखेत्। तस्यरज्जुतस्यदिक्साधनंकृत्वातस्यपूर्वापररेखतः यथादिशांमंडलपूर्वभागेबलनंज्यावत्सार्यमंडलपश्चिमभागेमध्येरेखतोदिग्विपरीत्येनबलनंप्रसार्यतयोरग्रबिंदुन्यस्यततो बिद्ग्रयोरेकसूत्रंतिर्यक्प्रसारयेत्। मध्यबिंदोःसकाशाद्बलनमार्गेणपश्चिमभागेमानेक्यार्धांगुलप्रमाणपरिमितसूत्रंनयेत्। तदंतेबिंदुन्यसेत्। तस्माद्बिंदोर्विक्षेपंयथादिशांज्यावत्प्रसारयेत्। तद्विक्षेपांतेबिंदुन्यसेत्। तस्मादेकसूत्रंमध्यबिंदोःप्रवेशयेत्। तन्मानैक्यार्धप्रमाण प्रतिमितंस्यात्। विक्षेपाग्रबिंदुमध्यबिंदूकृत्य। तत्रग्रात्प्रार्धांगुलप्रमाणसूत्रेणएकरज्जुंतोलिखेत्। तयोर्द्वयोर्यास्मि न्प्रदेशेसंबंधः। तत्रस्थंचवदेत्। अमीष्टग्रासलेखनप्रकारः। पूर्ववद्ग्राह्यार्धप्रमाणसूत्रेणरज्जुंतोलिखित्वापूर्ववद्बलनंप्र सार्यबलनमार्गेणमध्यबिंदोःसकाशाद्भुजानयेत्। तदंतेबिंदुन्यसेत्। तस्माद्ग्रयादिशांविक्षेपंप्रसारयेत्। विक्षेपाग्रबिंदुन्यसेत्। तस्मान्मध्यबिंदोःसकाशात्विक्षेपाग्रपर्यंतंकर्णांगुलप्रमाणसूत्रंनयेत्। यत्रकोटिकर्णयोर्योगः। तत्रत त्कालग्रात्प्रार्धप्रमाणसूत्रेणएकरज्जुंतोलिखेत्। तद्ग्राह्यरज्जुंतेयावत्। ग्राह्यैकरज्जुंतत्रविंशतितावद्ग्राह्यांगुल्याद्यवशेषमध्यग्रहणे बलनमार्गेणविक्षेपंयथादिशांनीत्वातत्रबिंदुनंस्यतस्माद्ग्रात्प्रार्धप्रमाणसूत्रेणरज्जुंतोलिखेत्। तद्ग्राह्यार्धंयावत्सविंशति तावद्ग्रहणं। मोक्षेतुमंडलस्यपूर्वभागेबलनमार्गेणमानैक्यात्प्रमाणसूत्रंनयेत्। तत्रबिंदुन्यस्यतस्माद्यथादिशांविक्षेपंन

यत्। तस्माद्ग्रात्प्रार्धप्रमाणसूत्रेणएकरज्जुंतोलिखेत्। तयोर्द्वयोर्यत्रयोगस्तत्रमोक्षंवदेत्॥ अथग्रहणकालेचंद्र स्यबलनमाह आदौचोत्पद्यधूम्रवर्णानुरूपःखंडग्रासोऽगारकानुकारी ग्रासेरक्तश्यामवर्णोधिकोर्धसर्वग्रासेपि गाढ़ःशीतरश्मिः २२ आदावितिः। आपादग्रहणपर्यंतंजंतेपादमोक्षानंतरंक्षुत्थमोक्षपर्यंतंधूम्रवर्णोनुरूपः धूम्रवर्णसदृशः। खंडग्रासे। अंगवर्णानुकारी। पादाग्रंजर्धग्रासपर्यंतंअर्धमोक्षंचनानंतरंपादमोचनपर्यंतंषड्वादसमू हवर्णसदृशः। ग्रासेरक्तश्यामवर्णोधिकृत्। अर्धादधिकेग्रासेअर्धाग्रंत्रिपादपर्यंतंरक्तश्यामः। रक्ताधिकःश्यामवर्णः सर्वग्रासेपिंगलः शीतरश्मिः। पूर्णग्रासेतत्समुवर्णवर्णः। अत्रपादग्रासपर्यंतंसर्वग्रासावधिदुक्तंवर्णं। मुच्यमानाव स्थायामपिसमानं २२ इत्याचार्यश्रीमन्महादेवकृश्रीमद्दिवाभित्रान्वयवारिधापरिपूर्णसुधाकरश्रीमच्छी निवासाद्दविरचितेकर्णप्रकाशाव्याख्यानेग्रारंभसंज्ञोचंद्रग्रहणाधिकारोनामपंचमोध्यायः अथसूर्यग्रहणमस्मि न्ध्यायेप्रतिपाद्यते। तत्रादौलंबननतिस्फुटनतिस्थित्यर्धमर्दार्धबाहुग्रहणपरिज्ञानंचाह। तत्रश्लोकत्रयाण्यालंबना नयनमुच्यते तिथेर्नताबाणलताग्रहार्धंस्तेनोनतःप्राचियुतोपरत्र रवार्कःस्फुटक्रांतिलवायुतोनास्वसेणसाम्या न्नदिशोलवास्युः १ लवोनपूर्णाकजशिंजिनीहताग्रहादिमौर्व्यारविखषड्गुणोद्धृतः फलंधनंस्यात्घटिकादिलंबनंति थेर्हिपूर्वापरभागयोर्मुहुः २ लंबनेनगुणिताग्रहमुक्तिर्व्यासषड्विहृतनाडिकलाद्यं तद्विलंबनवशात्तथाशिभान्वोः स्वर्णमत्रतमसोपिचनान्यथा ३ तिथेरिति। पूर्ववद्रविचंद्रराहुपर्वानयनादिनार्धान्यानायरविचंद्रोसमकलौकृत्वा दिनार्धपर्वयोरंतरंकुर्यात्। तेदवतिथिर्नतोभवति। सःबाणहतः। पंच५भक्तसंब्वद्ग्रयादिर्भवति। तस्यग्रहादिमितिसंज्ञा। तद्विधाकृत्वा। तेनोनितःप्राचियुतोपरत्ररवार्कःस्फुटः। प्राक्कपालेचेत्तेनोनितः ग्रहादिरहितःरविर्मध्यलग्नंस्यात्। पश्चा त्कपालेतद्वैपरीत्यंक्रांतिलवायुतोनस्वसेणतुल्यान्यदिशोलवास्युः। साधनात्तन्मध्यलग्नात्केंद्रंज्ञात्वाक्रांतिमानीय। तत्क्रां त्यक्षभागयोर्दिक्साम्यंयोगः। दिग्भेदयोगःतेलवास्युः। लवोनपूर्णाकजशिंजिनी। तान्लवान्नवति९भागाद्विशोध्यशेष

स्यजीवानेयाहतागृहादिभौर्व्यागृहादिजीवामानीयतयागुणितालवोनूनवतिभागज्यास्वस्वषड्गुणोधृता। षट्शता
धिकत्रिंशत्सहस्र ३६०० भक्तश्चेल्लुध्वंघटिकादिलंबनंस्यात्। ऋणंधनंपूर्वापरभागयोस्तियोर्हिलंबनंप्राङ्नपालेपर्वांते
ऋणं। अपरकपालेधनंकार्यं। मुहुः पुनः तत्संस्कृततिथेः पूर्ववन्नतमानीयतस्मात्गृहादिमानीसायनसमकलासूर्यपू
र्ववत्ऋणधनंकार्यं। गोलज्ञात्वातस्माक्रांतिरानयेत्। तक्रांत्यक्षयोर्दिक्साम्ययुतिः कार्या। तस्यलवासंज्ञालवभागान्न
वतिभागाद्विशोध्यशेषस्यजीवानेयगृहाद्यजीवांचानीयनवतिभागाद्शेषजीवागृहादिभौर्व्यागुणइत्यादषट्शताधिकत्रि
सहस्रभक्तंघटिकादिलंबनंभवति। तत्साद्धकपालेकेवलपर्वांतेऋणं। यस्योदयेपर्वघटीभिरूनाविलंबनास्या घटिकाहिकार्य
। सूर्योदयाद्ध्वंमधोमवेच्चेनदाविधेयासहितामनीषिभिः। सूर्योदयात्साध्यघटिकास्फुटाः स्युर्दिनार्धनाड्यासहितान्न
तंतत्। यदापर्वांतेलंबनंनहीनंस्यात्। तदालंबनघटिकापर्वघटिभिः ऊनार्धंयोजितेसतिन कार्या। तदासूर्योदयात्पू
र्वलंबनसंस्कृतपर्वघटिकास्युः। तत्घटिकाभिः दिनार्धंयोजितेसतिनत्तस्यात्। तस्मात्तत्कर्मानयेत्। पाश्चिमकपालेध
नंकुर्यात्। तस्मात्पूर्ववन्नादिलंबनांतंपुनःपुनर्गणयेत्। यदापूर्वानीतंपश्चादानीतलंबनंचसमंस्यात्तदास्फुटलंबन
मवति। तत्स्फुटलंबनंकेवलपर्वांतेऋणंपाश्चिमेधनंकार्यंएवंकृतेसतिकेवलपर्वांतमतिस्फुटंस्यात्। अथवाषड्गुणि
तनतभागान्रवोऋणधनंकृत्वातक्रांत्यक्षयोर्दिक्साम्येयोगःभेदेवियोगः कार्यः तस्यक्रमजीवाचउक्रमजीवाचक्रा
र्धक्रमजीवात्रिघ्न्य १२० तोविशोध्यशेषनघ्नागंक्रमजीवयागुणइत्यात्रिघ्न्यायाविभजेत्तलब्धंत्रिंशत ३०० भक्तंचेत्स्फु
टलंबनंस्यात्। अथवालवोननवतिभागज्ययात्रिघ्न्याभक्तंचेत्फलेनयहाद्यज्याभक्तश्चेल्लुध्वंद्विगुणितंलंबनंस्यात्। अ
थवागृहाद्यज्यात्रिंशा ३० भाजितश्चेत्तलंबनंभवति। अथवालवोननवतिघ्न्याभक्तैकराशिज्यावर्गेणभक्तागृहादिज्या
लंबनंभवति। अथवालवोननवतिभागज्यागुणितागृहादिज्याषष्ट्या ६० भक्तश्चेत्तलंबनविनाडयस्युः ३ अथ
द्वाभ्यांश्लोकाभ्यांस्फुटनतिमाह भुक्त्यंतरलवगुणेनहतंविभक्तंव्योमाब्धिनागशिशिभृत्लवदिउन्नतिस्यात्। तत्स

409
1918

लिकामृतमयूरवशरायुतोनोनत्यासमाक्रकुभोभवतिस्फुटोसौ ४ भुक्त्यंतरमिति। भुक्त्यंतरलवगुणेनहतं
गत्यंतरलवज्यायागुणितं। विभक्तंव्योमाब्धिनागशिशिभिः। अष्टशताधिकसहस्र १८०० भक्तंलवादिउन्नतिस्यात्। अ
त्रायंविवेकः। क्रांत्यक्षयोर्यो गोदक्षिणनतिः। अक्षभागेभ्योविशोधितामपिक्रांतेश्चदक्षिणनतिः। क्रांतिभागेभ्योक्षभा
गविशोधिताश्चेदुत्तरनतिः। अथवालवक्रमजीवागत्यंतरं। शगुणितात्रिघ्न ३०० भक्तंचेत्फलंनतिः। अथवागत्यंतरंशगुणा
त्रिंशतालवज्ययाभक्तंचेत्फलंनतिः स्यात्। लंबनेनगुणितायहभुक्तिः स्फुटलंबनेनगुणितांचंद्रसूर्यराहुगतयः व्योमषट्वि
श्वेतैचक्रलाद्यं। षष्टि ६० भक्तश्चेल्लब्धंकलादि। तत्कालादिफलंतद्विलंबनवशात्क्षिप्तान्वोः स्वर्भमत्रतमसोपिचान्य
था। प्राक्कपालेचंद्रसूर्ययोरूनं। प्रत्यक्कपालेचेत्धनं। राहोर्विपरीत्यं। एवंकृतेलंबनसंस्कृतचंद्रविक्षेपमानीयदिशांज्ञा
त्वायुतोनोनत्यासमान्यक्रकुभोभवतिस्फुटोसौसमदिशोर्विक्षेपनत्योर्योगः। दिग्भेदेवियोगःकार्यः। एवंकृतेस्फुटन
तिस्यात्। स्फुटनतिरेवस्फुटविक्षेपः ४ स्फुटास्थित्यर्धमाह स्थितिविमर्ददलेशाशिपर्ववत्समभिधा
यतनश्चनित्यस्फुटात् स्थितिदलोनयुतादिहलंबनेस्थितिदलेचमुहुर्मुहुरानयेत् ५ स्थितीति। स्थितिविमर्ददं
लेशाशिपर्ववत्समभिधाय। स्थितिदलंचविमर्ददलंचास्थितिविमर्ददले। शाशिपर्ववत्। सोमग्रहणवत्। विधेया। अ
त्रास्थितिदलइत्युक्त्वात्पूर्वंसूर्यबिंबचंद्रबिंबमानैक्यार्धानिपूर्ववद्विधेयनिक्षेपवर्गस्फुटविक्षेपवर्गमानैक्यार्ध
द्विशोध्यमूलंकृत्यषष्ट्यागुणइत्वागत्यंतरेणभक्तंलब्धास्थित्यर्धंभवतितत्स्थित्यर्धंद्विधाकृत्वाकेवलपर्वांतोदकं
विशोध्य एकंयोज्यतस्मात्रवांतान्नतमानीयतस्मात्तवार्कमानीयदिशांज्ञात्वातस्माक्रांतिमानयेत्। क्रांत्यक्षभागयोः सा
म्ययुतिः भेदविश्लेषः सएवलवः तद्विधाकृत्वाएकंभवतिभागाद्विशोध्यशेषस्यज्यामानीयसाज्यागृहादिज्ययागुणिता
षट्शताधिकत्रिंशत्सहस्र ३६०० भाजितेचेत्तलंबनंस्यात्। तदेकत्रस्थापनीयं। अपरलंबनस्यज्याकार्यात्यागत्यंतरगु
णइत्वाअष्टशताधिकसहस्र १८०० भक्तंचेत्फलंनतिस्यात्। तत्स्थित्यर्धेचंद्रगत्यागुणितंषष्ट्या ६० विभक्तंचेत्तलब्धंलि

दिकंस्यात्। तल्लिप्तादिलंबनंसंस्कृतचंद्रेपूर्ववत्ऋणधनंकुर्यात्। ततःस्थित्यर्धरविगत्यायुणितंषष्टिभक्तंरवौपूर्ववत्
ऋणधनंकार्यं। तस्मात्चंद्रविक्षेपमानीयतद्विक्षेपनतिंपूर्ववत्संस्कृत्यतस्मात्पूर्ववत्स्थित्यर्धमानयेत्। पूर्वस्थापितलं
बनंमध्यकाललंबनंइदानीमानीतलंबनयोरंतरंइदानीतद्विक्षेपनतिंपूर्ववत्संस्कुर्यात्। पूर्ववत्ऋणधनंकृत्वासंस्कृतप
र्वात्तात्स्थित्यर्धस्पर्शकालेचंद्रोध्यतस्मात्नतादिलंबनांतगणइत्यतल्लुबनंकाचित्स्थापनीयं। पुनर्लंबज्यागत्यंतरयु
णिताज्ज्यात्रयाधिकसहस्रभक्तेचनतिः। पुनःस्थित्यर्धगुणितंचंद्रार्करागुगतयः षष्टिभक्ताश्चिल्लुब्धकलादिचंद्रादित्य
राहुषूपूर्ववत्ऋणधनंकार्यास्थित्यर्धसहितंतस्मात्चंद्रात्पूर्ववद्विक्षेपमानीयनतिविक्षेपयोः पूर्ववत्संस्कारः कार्यः। ए
वंकृतेतत्कालद्विक्षेपःस्फुटस्यात्। तद्विक्षेपास्थित्यर्धोनंरंपूर्ववत्कुर्यात्। एवंपुनःपुनःलंबनास्थित्यर्धंचपश्चादानीत
लंबनास्थित्यर्धंचसमंस्यात्तदास्फुटलंबनास्थित्यर्धंस्यात्। केवलपर्वांतस्थानीतस्फुटलंबनंकेवलपर्वांतेपूर्ववत्संस्कृतं
चेत्लंबनंसंस्कृतस्फुटमध्यकालस्यात्। मध्यकालानीतास्थित्यर्धोनितंकेवलपर्वांत्रादानीतस्फुटलंबनंस्पर्शकाल
लस्यस्फुटलंबनस्यात्। तस्मिन्केवलपूर्वांतेस्पर्शकालानीतस्फुटलंबनंपूर्ववत्ऋणधनंकुर्यात्। तस्मिन्स्पर्शकालानी
तस्फुटास्थित्यर्धमूनितंचेत्स्फुटस्पर्शकालः। अत्रायंविशेषः। मध्यकालानीतस्फुटलंबनस्पर्शस्फुटलंबनयोरंतरंस्प
र्शास्थित्यर्धसहितंस्पर्शकालस्यस्फुटास्थित्यर्धंस्यात्। प्राक्कपालेप्रत्यक्कपालेचायंन्यायः। स्पर्शमोक्षयोः समएवंतत्स्फुट
स्थित्यर्धंलंबनसंस्कृतस्फुटमध्यकालादूनितंचेत्स्फुटस्पर्शकालः। ग्रस्तोदयेपर्वघटीभिरूनास्थित्यर्धनाडीसहितंकार्यं।
सूर्योदयादूर्ध्वंमध्यंतदानीयुक्तविहीनायदिपर्वकालः। ग्रस्तोदयेति। यदापर्वघटिकायाः स्थित्यर्धनाडीऽधिकास्या
त्। तदानींपर्वघटिकाभिः स्थित्यर्धनाडीरहिताकार्या। तदानींसूर्योदयात्पूर्वस्पर्शकालस्यात्। एवंस्पर्शकालेमोक्षकाले
मोक्षास्थित्यर्धनाडीसहितात्चेत्सर्वघटीभिः। सूर्योदयादुपरिमोक्षकालस्यात्। एतल्लक्षणसूर्योदयादुपरिपर्वास्तितमतिज्ञे
यं। सूर्योदयात्पूर्वघटिकाचेत्स्पर्शास्थित्यर्धनाडीपर्वघटिकाभिःसहिताकार्या। मोक्षास्थित्यर्धघटीपर्वघटीभिरूनाका

र्या। एवंकृतेसूर्योदयात्पूर्वापरंस्पर्शमोक्षौस्यातां। मोक्षेतुकेवलपर्वांतेकेवलपर्वांतानीतास्थित्यर्धंयोज्यास्थित्यर्धसंस्कृ
तपर्वांतान्नतमानीयलंबनांतंपूर्ववत्कृत्वातल्लुबादिनत्यंतत्पूर्ववत्कुर्यात्। नतकालिकास्थित्यर्धात्। स्थित्यर्धमर्दार्ध
जित्यादिनालिकात्मानीयतद्रविचंद्रयोर्धनंकार्यं। राहोरूणं। एवंसंस्कृतचंद्राद्विक्षेपादिस्थित्यर्धंतंपूर्ववदानयेत्। ए
वंपुनःपुनःलंबनास्थित्यर्धंकार्यं। यदापूर्वानीतलंबनास्थित्यर्धंपश्चादानीतनलंबनास्थित्यर्धंचसमंस्यात्तां। तदामोक्ष
कालस्यलंबनास्थित्यर्धंस्फुटोस्तः। तस्मात्केवलपर्वांतादेतंमोक्षस्फुटलंबनंपूर्ववत्ऋणधनंकुर्यात्। तदामोक्षकालस्य
लंबनसंस्कृतस्फुटपर्वांतस्यात्। तस्मिन्स्फुटमोक्षास्थित्यर्धसहितेसतिचतुर्थमोक्षकालोभवति ५ अथश्लोकार्धेलं
बनमर्मार्धाह प्राग्लंबनंमध्यविलंबनाच्चवेदनलमलंयदिमोक्षलंबनं ऋणाख्ययोस्यादधिकंविमोक्षजंग्रग्रासम
लंयदिधार्धनाख्ययोः ६ तदंतरेणास्थितिखंडकंनिजंयुतंस्फुटंस्याद्ययुतंततोन्यथा युत्यायुक्तलंबनयोर्धनर्णयोरयंवि
धास्यात्खलुमर्दखंडयोः ७ प्रागिति। प्राक्कपालेस्पर्शलंबनंमध्यविलंबनात् मध्यकाललंबनात् ऊनलंऽधिकं
मध्यलंबनात्। मोक्षलंबनमधिकंतदार्धनसंज्ञंस्तः। तदंतरेणास्थितिखंडकंनिजंयुतंस्फुटंस्यात्। ऋणाख्ययोरंतरंप्राक्कपा
लेमध्यलंबनस्पर्शलंबनयोरंतरंस्फुटस्पर्शास्थित्यर्धसहितंचेत्लंबनसंस्कृतस्फुटस्पर्शास्थित्यर्धंस्यात्। मध्यलंबनमोक्षलंब
नंस्फुटमोक्षास्थित्यर्धसहितंचेत्लंबनसंस्कृतस्फुटमोक्षास्थित्यर्धंभवति तास्थित्यर्धंमध्यलंबनसंस्कृतपर्वांतात्ऋणधनंका
र्यं। एवंकृतेस्पर्शमोक्षकालोस्फुटोस्तः। युत्यायुतिर्लंबनयोर्धनर्णयोः यदामध्यलंबनंप्रत्यक्कपालेस्यात्स्पर्शकाललंबनंपूर्वक
पालेस्यात्तदायोर्लंबनयोर्युतिः कार्या। यदामध्यलंबनंपूर्वकपालेप्राक्कमोक्षलंबनमपरं। तदापितयोर्युतिः। एवंसंस्कृतलंब
नंप्राक्कपालेस्फुटास्थित्यर्धसहितंलंबनसंस्कृतस्फुटास्थित्यर्धंभवति। प्रत्यक्कपालेस्थित्यर्धसहितस्फुटास्थित्यर्धलंब
नसंस्कृतंस्यात्। अयंविधेयः। खलुमर्दखंडयोः। स्पर्शमोक्षमर्ददलयोरपिस्थित्यर्धवत्संस्कारोविधेयः। तद्यथा। ग्रात्यार्धंया
त्कार्धनिवर्गविक्षेपवर्गयोरंतरपदंषष्टिघ्नंगत्यंतरभक्तंमध्यकालविमर्दार्धंभवति। तन्मर्दार्धानकेवलपर्वांतान्नतमा

नीयतस्मान्नलंबनांतंकृत्वानतिंचानीयमध्यविमर्दगुणितरविचंद्रराहुगतयःषष्ट्याप्तकाःकलायदास्युः।नेपूर्ववत्करणं
अनंकुर्यात्रेलंबनसंस्कृतपर्वांतंस्यात्।तस्माद्विमर्दार्धंविशोध्यतस्मान्नतादिविमर्दार्धांतंपूर्ववदानयेत्।यदापूर्वानीतंप
श्चादानीतंचसमःस्यात्तदावर्ग्यतेगणयेत्।नहिलंबनविमर्दार्धंकेवलपर्वांतादुक्तवत्कृतंचेत्तुल्यनिमीलनका
लस्यात्।उन्मीलनेतुकेवलपर्वांतेविमर्दार्धसहितमितिविशेषः। विमर्दखंडयोरपिप्राग्लंबनंमध्यविलंबनाद्देवेत्यादि
विधिकार्यः।इष्टभुजाभिष्ट्यासादिष्टकालानयनमाह स्याद्बाहुरत्रानिमतस्फुटेषुजास्त्यर्धनिघ्नोविवृतःस्फु
टनमः स्फुटस्तनोग्यासविधिर्यथोक्तवत्तत्रोप्यनेहाविपरीतकर्मणा ६ स्याद्बाहुरिति।इष्टकालस्फुटविक्षेपाद्दु
सन्नास्त्यर्धगुणितइष्टकाललंबनसंस्कृतस्फुटास्त्यर्धनामकाइष्टकालभुजास्यात्।तत्रकालविक्षेपएवकोटिः।तद्वर्ग
योगस्यमूलंत्रिज्या।तत्रोग्यासविधिर्यथोक्तवत्तत्रकालकर्णमानेक्षार्धात्खेधितत्रेषाग्यासःस्यात्।तत्तोप्यनेहाविपरी
तकर्मणा।तत्स्याद्भासाद्विपरीतेनइष्टकालःपूर्ववल्लंबनमानयेत्।केवलपर्वांतादभीष्टकालहीनमध्यास्त्यर्धगुणि
तंविशोध्यतत्कालस्थनतमानीयतस्मात्पूर्ववल्लंबनमानयेत्।नेदकत्वनिक्षिपेलवज्यायाःपूर्ववन्नतिमानयेत्।पुनरभीष्ट
हीनास्त्यर्धगुणितचंद्रादित्यराहुगतयःषष्ट्याप्तकाश्चेतुर्ध्नकलादिसमचंद्रपूर्ववत्करणधनेकार्यं।तत्रविक्षेपादिस्त्य
र्धांतंनयेत्।एवंपुनःपुनःकार्यं।यदापूर्वानीतलंबनास्त्यर्धंपश्चादानीतास्त्यर्धंचसमेस्यातां।तदालंबनास्त्यर्ध
स्फुटेस्तः।तत्रास्त्यर्धजाभीष्टनंगत्यंतरगुणितंषष्टिभाजितंमध्यभुजोभवति।तन्मध्यभुजःइदानीमानीतास्त्यर्ध
संगुणितंलंबनसंस्कृतस्फुटास्त्यर्धनाभाजितश्चेल्लब्धंस्फुटभुजस्यात्।लंबनसंस्कृतस्फुटास्त्यर्धनाममध्यका
लंबनेदानींतनलंबनयोरंतरसंस्कृतास्त्यर्धामित्यर्थः।एवंसर्वत्रसूर्यग्रहणेऽयंन्यायोयोज्यः।नतिसंस्कृतन
लंबंद्रविक्षेपएवकोटिः।तद्वर्गयोगामूलंदमिष्टकर्णइति।विपरीतकर्मणेत्यस्यायंभावः।ज्ञात्रानत्यासोनमानेक्षार्धवर्गा
न्नतकालविक्षेपवर्गशोधितान्मूलीकृतान्षष्टिघात्व्यर्कगत्याप्तकात्लब्धंफलंतत्कालास्त्यर्धात्खेधितंचेत्खेषमिष्ट

कालास्यात्॥९॥ ॥अथग्रहणेविद्यमानेपितस्यानययाध्यिमाह मार्तंडबिंबस्यदिवाकरांशाःसल्लक्ष्यतेनोरव
नुखंडितोपि सुतीक्ष्णतांबन्महतःसुधांशोःसुनिर्मलत्वादपिषोडशांशाः ९ मार्तंडेति।महतःमार्तंडबिंबस्यदि
वाकरांशाःद्वादश१२भागाःखंडितोपि।चंद्रबिंबाद्यादितोपिसुतीक्ष्णभावात्प्रतापाधिक्यात्नोसंलक्ष्यते।नदृश्यतेसुधांशोर
पिचंद्रस्यषोडशांशाःषोडशभागाःतन्मसाखंडन्नःसुनिर्मलत्वान्नदृश्यते।द्वादशांशास्तुदृश्यतएव ९ अथग्रस्तस्यसू
र्यस्यवर्णमाह आदावंतेबहुलधूम्रधूमधूम्रोरविस्यादर्धत्यक्तःक्रयतिपुनःकालतांकज्जलस्य अर्धादूर्ध्वंकव
लितनुःकृष्णतांम्रःपिंगःसर्वग्रासेभवतिसविनासर्वदाकृष्णएव १० आदाविति।आदावंतेबहुलधूम्र
धूम्रोरविस्यात्।स्पर्शादारभ्यपादग्रासपर्यंतंत्रिपादमोक्षानंतरंद्युत्थमोक्षपर्यंतंहुतभुजःअत्यंतबहुलधूम्रधूम्रवर्णस
दृशः अर्धात्खेधितः।क्रयतिपुनःकालतांकज्जलस्य।बिंबस्यार्धग्रस्तेऽर्धेमुक्तसर्वमर्धंअंजनसदृशवर्णस्यात्।अर्धादूर्ध्वं
कवलितनुःकृष्णतांम्रःपिंगः।त्रिपादग्रस्तेमुच्यमानेत्रिपादेआद्योंशाःकृष्णमध्योंशास्तांम्रःतृतीयांशाःगुणस
र्णः।सर्वग्रासेभवतिसविनासर्वदाकृष्णएव।सर्वमंडलग्रहणेसूर्यःसर्वदासर्वांशःकृष्णवर्णएव १० इत्याचार्यश्रीमं
महाराष्ट्रमहाराष्ट्रकरश्रीमद्दिवाकरात्मजान्वयवारिराशिपारिपूर्णसुधाकरश्रीमद्गणेशनिवासप्रणीतेग्रहलाघवाभिधानेग्र
हग्रासंज्ञेसूर्यग्रहणाधिकारोनामषष्ठोध्यायः अथास्मिन्नध्यायेग्रहणमुदयास्तगणनप्रकारमाह उनोग्रहो
लघुगतिस्तरणेरुदेतिप्राच्यामतोधिकगतिस्तदधिकःप्रतीच्यां शक्रस्यदिश्यधिकमुक्तिरिवास्तमूनोयात्यस्तमूनगतिर
प्यधिकोपरस्यां ९ उनइति।तरणेःसूर्यात्।उनोग्रहःलघुगतिः।ऊनमगतिग्रहः।तेकुजगुरुशनयःशक्रो।बुध
शुक्रो।चयदाऊनमधनि।तदाप्राच्यामुदेति।ततःसूर्यादधिकगतिग्रहः।चंद्रः।अवक्रोबुधशुक्रोएतेजाधिकगतयःजाधि
काःसंतःप्राच्यांदिशिउदेति।उदयंतीत्यर्थः।शक्रस्यदिशिप्राच्यांदिशि।जाधिकमुक्तिः।चंद्रबुधशुक्राःरविरुनाःसंतः
अदृश्यंयांति।अस्तंयांतीत्यर्थः।उनगतिःकुजगुरुशनयःअवक्रो।बुधशुक्रोचरवेरधिकाःसंतःअपरस्यांप्रतीच्यांदिश्य

411
1918

कर्णप्र॰टि॰ २०

स्तंयातीत्यर्थः। अयमभिप्रायः। चंद्रः जयक्को। बुधशुक्कोच्चरवेरुनाऽधिकाः संतः प्रागस्तंपश्चादुदयंयातीत्यर्थः १.
जथग्रहाणांकालांशाकानाह कालांशाकौदिनकरेर्नवभिः कुचंद्रर्क्षवेदैर्दिनेस्तुरंगसीत्तकरैः क्रमेण सौम्यात्
शुक्रगुरुसोमसुन्नार्किभ्यो हीनाधिकादिनपतेस्फुटदृग्यदृग्यदृग्याः २ कालांशाकैरिति। चंद्रः दिनकरै॰। द्वादशभि॰१२
भागैः दिनपतेः सूर्यात् ऊनोधिकोवायदास्यात्तदातस्यऽस्तमयउदयोभवति। शुक्रः नवभि॰९ भागैः ऊनाधिको सूर्यात्
भवति। तदातस्यऽस्तमयउदयोभवति। वक्रगः शुक्रः नवभि॰९ भागैः ऊनाधिकः सूर्यात्तदातस्यास्तमुदयोभवतः। बृहस्पति
कुचंद्रैः एकादशभि॰११ भागैः। बुधः विश्वैः त्रयोदशभि॰१३ भागैः। द्वाभिः दिनैः पंचदशभि॰१५ भागैः। कुजः तुरंगसीत्तकरैः सप्त
दशभि॰१७ भागैः। सूर्यात्एतेयदाहीनाधिकास्तदाऽदृग्यदृग्याः अस्तमिनउदिताश्चभवंति २ अथग्रहाणामयनसं
स्कारमाह ग्रहस्यदोर्ज्यारहितात्त्रिभज्यकासेपाहृताद्दोलनवाप्तविभिर्भजेत् लिप्तादिबाणायनयोः समाशयोः कुर्याद्द
र्णमिन्नदिशोर्धनंग्रहे ३ ग्रहस्येति। जयनांशसहितस्यग्रहस्यदिशंज्ञात्वाभुजजामानीयरहितात्त्रिभज्यकासात्त्रिज्या
वा॰१२॰ रहितासेपाहृणास्वस्वपातोनकेवलग्रहोसन्नविक्षेपेणगुणितात्रोलनवाप्तविभिर्भजेत्। समनवत्याधिकत्वात्तद्ये
न २९ ७ भक्ताश्चेल्लब्धंलिप्तादिबाणायनयोः समाशयोः कुर्याद्दर्णमिन्नदिशोर्धनंग्रहे। ग्रहेजयनविक्षेपयोः समदिक्केकृर्ण
कुर्यात्। भिन्नदिक्केधनंकुर्यात्। त्रदाजयनसंस्कृतग्रहस्यात् ३ जयसंस्कारमाह क्षेपेक्षप्तासंगुणितर्क्ष भा
क्षितलब्धंकलासंस्वर्णंविधीयते यास्योत्तरक्षेपमवंनमश्चरेप्राचिस्थितेपाश्चिमभागगैः अन्यथा ४ क्षेपति। क्षेपेस्वस्वर्णे
क्षेपेऽक्षप्तासंगुणितविषुवच्छायागुणितेऽर्कभाजितेद्वादशभि॰१२ र्लब्धंकलादिकंग्रहेप्राचिस्थितेप्राक्कपालस्थितेदक्षि
णविक्षेपश्चेत्संउत्तरश्चेत्तत्स्वर्णंकार्यं। पश्चिमभागैरन्यथा पश्चात्कपालेग्रहेदक्षिणविक्षेपश्चेत्तत्स्वर्णं। उत्तरश्चेत्धनं ४

जथग्रहाणांउदयास्तस्फुटीकरणमाह एष्येत्यादिधिकाद्भनोर्कस्वगयोर्यस्याहिनाडीगणोयुक्तासौविवरोदयेविधि
स्यंपश्चात्मचक्रार्धयोः एकर्क्षास्थितयोस्तयोः पुनरसोसाध्योतरस्थेर्लवैः

:श्रीः
२०

413
1918

नोक्षिते ५ एष्यइति। अर्कस्वगयोः अयनाक्षसंस्कृतयोः सूर्योदयेस्फुटीकृतयोः आदित्यग्रहयोर्मध्येयोल्प
स्तादिष्यभागाद्यानीयतत्स्वोदयोः नगुणइत्यादिनांशता २० भजेत्तल्लब्धमेष्यविनाडिकादयः योधिकस्तस्माद्गतभागाद्यानी
यतत्स्वोदयेनगुणइत्यादिनांशतादिभजेत्तद्गतविनाडिकादियुक्तोसौविवरोदयेविधिरयं। आदित्यग्रहयोर्भिन्नराशिस्थत्वेसति
नयोर्विनाडयोर्योगः कार्यः। अस्योजयंविधिः भिन्नराशित्वइत्यर्थः। पश्चात्सूर्यास्तमयकालेचक्रार्धं ६ युतयोः षड्भाशियुतयोः
र्ग्रहयोरित्यर्थः। अत्रापियध्योल्यादित्यादिविनाडीसंयोगांतंसर्वंकार्यं। एकर्क्षास्थितयोस्तयो पुनरसोसाध्योतरस्थैर्लवैः
। नयोरयनाक्षसंस्कृतयोरर्कग्रहयोः एकराशिस्थयोः सनोस्तदात्तयोरंतरभागादयः स्वोदयेनगुणइत्यादिनांशच्छकाः विना
डयः स्युः। कालांशाश्चदृग्धृतश्चकथितोलंबस्तद्वद्दोनोक्षितं। ताविनाडयः दृग्धृताः १० सत्यकालांशाः स्युः। विवरोदयजा
नीतविनाडयस्ताश्चदृग्धृता १० श्चेत्कालांशाः स्युः। स्वस्वकालांशकेभ्यः दृग्धृतकालांशायदाऽल्पास्युस्तद्वद्दोनदृग्यते।
यदासमास्तदास्तमयोदयसमयः। तत्समीकरणमुच्यते। ध्रुवकालांशकेभ्योदृग्धृतकानामधिकोनकलाःस्वस्वगत्या गु
णिताऽर्कग्रहगत्यंतरेणभाजितश्चेल्लब्धंकलादिस्वग्रहेदृग्यद्याऽर्कसंस्कृणंधनंकार्यं। तास्मिन्कृतेतयोरेष्योल्यादित्यादिदृग्धृ
तकालांशकपर्यंतंपुनः पुनः कार्यं। यदासदृग्धृतभागाः ध्रुवकांशसमास्तदादृग्यवास्यादितिप्रकृतानुसोरणज्ञेयं ५

जथउक्तमेवार्थंभागांतरेणाह उक्तांशांतरकालललंबांतरलिप्ताभुक्त्योर्विवरेणदृक्तग्रहक्षान्वोः। वक्रोपगतेषु
देरगतियुत्यागंम्यनिगतानिचसंतिदिनानि ६ उक्तइति। ग्रहक्षान्वोस्तत्कालललंबांतरलिप्ताः दृग्धृत १० भागध्रुव
कालांशकेभ्योंशांतरलिप्ताः तयोर्गत्यंतरभक्तास्त्येतल्लब्धानिदिनानि। ध्रुवकालांशकेभ्योदृग्धृतकालांशकाऽधिका
श्चेदेष्यदिनानि। उनाश्चेद्गतदिनानि। एवमस्तमये। उदयेत्तद्दूपरीग्रहेवक्रगतसतितयोर्गतियुत्याभाज्या ६

जथऽस्तमयोदययोः पूर्वानीतदिनानामेष्यानिगानिज्ञानार्थमाह इष्टांशकेभ्योत्यधिकाध्रुवांशाः यदोनदातानिगा
नान्यहानि अस्तोल्लिकागंम्यदिनान्यवहिर्विलोमत्रस्तान्युदयग्रहाणां ७ इष्टेति। इष्टांशकेभ्योयदाऽधिक। ध्रु

415
1918

अशीत्यधिकशत १८०भागोन।व्यर्केंदुभागास्तिथिभाजिताः सितंसवेत् ५ अथपरिलेखनप्रकारमाह
बिंदोर्बाहुः संन्निवेश्योयथाशंपश्चादिंदोः प्राङ्मुखी कोटिरस्मात् प्राच्यामिंदोः पश्चिमाशामुखी साकर्णास्तिर्याग्बिंदुको
टयग्रमध्य ६ बिंदोरिति सुसाधितायामवनौ।मध्येबिंदुन्यस्येंदोर्बाहुर्यथादिशंनिवेशः उत्तरमुज्झ्येत्बिंदोर
त्तरतेप्रसार्यः दक्षिणश्चेद्दक्षिणमुज्झ्येबिंदुन्यस्यचंद्रपश्चात्कर्णगोन्नत्यादिंदोः कोटिः प्राङ्मुखीनेया।कोट्यंतेबिंदुन्य
सेत्।प्राच्याप्राग्दिक्भागेचंद्रस्यात्तदुज्झादिंदोः कोटिः पश्चान्मुखीनेया।तदंतेबिंदुन्यसेत्।कर्णस्तिर्याग्बिंदुकोट्ययमध्ये।मध्य
बिंदोरारभ्यकोट्ययपर्यंतंतिर्यक्कर्णनयेत् ६ कर्णकोटियुजिषड्भिरंगुलैर्मंडलंशशाङ्कतःसमालिखेत् आनयेदपरतः
सितंविधोः कर्णमार्गगमथासितेसितं ७ कर्णकोटीति।नाडृशाकर्णकोटियोगेशशाङ्कतःचंद्रस्यषड्भिरंगुलैः षडंगुलपरिमि
तसूत्रेणएकंदृक्तंलिखेत्।आनयेदपरतःसितंविधोःकर्णमार्गगमयासितेसितं।यत्रषडंगुलदृक्तस्यात्सयास्मिन्देशेकर्णयो
गःतत्रबिंदुन्यस्यतस्मात्षडंगुलपरिमितसूत्रेणदृक्तंलिखेत्।तदाचंद्रस्यशृंगोन्नतिस्यात्।यद्वातदस्यकर्णस्ययत्रयोगः
तत्रबिंदुन्यस्यबिंदोरपरतःपश्चिमभागेसितांगुलपरिमितसूत्रंकर्णमार्गेन्यस्यबिंदुन्यस्यतत्रषडंगुलपरिमितसूत्रेणदृक्तंलि
खेत्।एवंकृतेतृतीयंशृंगोन्नतिस्यात्।ज्ञासितेकुज्ञेसितंशुकूंस्यात् ७ सितांगविश्लेषदलेननंदाद्दृतधिकंस्यात्तल्लिखेत्
सूत्रं नीतेनशुक्लादनुकर्णगत्यादृक्तंलिखेत्तेनसितप्रसिध्यै ८ सितांगेति।सितांगविश्लेषदलेन।सितांगुलस्यजंगुल
स्यषण्णांचज्ञनरदलेननंदाद्दृतं९नवभक्तंचित्तलब्धानियदिपूर्वानीतसिद्धादधिकं।तदापरिलेखसूत्रंपूर्वानीतशुक्रसू
त्रपरिमितसूत्रेणसितप्रसिध्यै।एवंदृक्तंलिखेत् ८ इत्याचार्यश्रीमन्महाराज्यमहारकश्रीमद्विश्वामित्रान्वयभू
वारांशपरिपूर्णसुधाकरश्रीमद्भूनिवासमहविरचितेकरणप्रकाशाख्यारत्यानेग्रहासन्नेष्टगोन्नत्यधिकारोनामत्रयोदशोध्याय-
अथास्मिन्नध्यायेग्रहाणांयुत्याधिकारगणनमाह अनलमंदशीघ्रोरविचरेलभुक्तेरुनेयवक्रिण्यधिकेनुलो
मात्।।वक्रास्तयोः शीघ्रगतावनलेगम्यायुतिस्तेभ्वगतान्यथास्यात् १ अनलेति।अनलमुक्तेरविचरेलभुक्तेरुनेयस्मि

413
1918

न्दिनेययोर्ग्रहयोर्योगसद्भावःन्नास्मिन्दिनेन्नयोस्फुटोकार्यो।अनयोरयनसंस्कृतोचकार्यो।गतीचानीये।एवंकृतेऽधिकभु
क्तेग्रहेऽलपभुक्तेः अलपभुक्तिग्रहस्फुटादूनसतितदानीमेष्यस्तयोर्योगः।अथानुलोमान्शीघ्रगतेरलपगतिर्ग्रहात्वक्रिण्य
धिकेसतिऽधिकभुक्तेश्चग्रहेऽधिकेसतितदानीमपितयोरत्रयोयोगःवक्रस्थयोःशीघ्रगतावनलेवक्रस्थयोर्द्वयोःसत्योःशी
घ्रगतावधिकगतिर्ग्रहेऽलपगतिर्ग्रहात्ऽजनलेऽधिकेसतितत्तयोस्तदानींगम्यायुतिः।तयोर्योगएष्यस्यात्।तेभ्वगतान्यथास्या
त्।तेस्त्रिभियोगः ऽन्य,थाचेत्तयोर्ग्रहयोर्युतिर्गत्तास्यात्।तद्यथा।अलपभुक्तेर्ग्रहात्ऽधिकभुक्तिर्ग्रहेऽधिकेयुतिर्गता।
अलपभुक्तिर्ग्रहादधिकभुक्तिर्ग्रहेवक्रगेऽनेसतिगता।वक्रस्थयोर्गतयोर्मध्येऽलपगतिर्ग्रहात्ऽधिकगतिर्ग्रहेऽनेसति
युतिर्गतेत्यर्थः १ अथयोगगणनमाह अवक्रयोर्वक्रितयोश्चस्वभुक्त्यंतरेणांतरलिप्तिकास्युः दिनानिव
क्रिण्यधभुक्तियुत्याप्तेयागतिस्तेरगतागतावा २ अवक्रयोरिति।अवक्रयोःस्वभावगत्योःग्रहयोर्वक्रितयोर्वक्रस्थयो
र्ग्रहयोश्चांतरकलास्तयोर्गम्यंतरेणविभजेत्।वक्रिण्यधभुक्तियुत्या।एकःवक्रःअपरःस्वभावगतिः।तयोरंतरकालाः त
योर्ग्रहयोर्गतियोगेनविभजेत्।एवंकृतेलब्धानिदिनानिभवंति।एष्यदिनाईानिगतदिना।ईानिचभवंति।ज्ञेयागतिस्तेरगताग
तागतावा।तेस्त्रिभियोगेःऽगता।एष्यगतिःगतागतगतिः।तयोर्ग्रहयोर्भवति।अवक्रयोरित्यनेननजनलमुक्तेरविचरेलभु
क्तेरुनेइत्यनदेष्यगतयोगेऽधिकेइत्यनदुक्तंस्यात्।वक्रितयोरित्यनेनवक्रगतयोरित्यनेनवक्रस्थयोःशीघ्रगतावनल
इत्यतदेष्ये।अधिकेगतइत्युक्तंस्यात्।वक्रिण्यधभुक्तियुत्याइत्यनेनवक्रिण्यधिकेनुलोमइत्यतदेष्ये।ऊनेगतइत्युक्तंभव
ति २ अथयोगतात्कालिकमाह गतिरंतरलिप्तिकाहतागतियोगांतरभाजितातदा अगतेस्वभुक्तेगतेकला
श्चरेवक्रगतेन्यथासमौ ३ गतिरिति।तयोर्ग्रहयोरंतरकलास्वभुक्त्याष्टथग्गुणद्वत्वायदाएकःवक्रःअपरःऋजुगतिः
तदातयोर्गत्यंतरेणभाजितावेभयोःष्टथक्फलंस्यात्तत्कलादिएष्ययोगेधनंकार्यंगतयोगेचेदृणंकार्यं।वक्रग्रहयोःसतोःतदातयो
र्गतियोगेनष्टथक्साजयेत्।तत्फलंष्टथक्कलादि।तत्रद्रहेएष्ययोगेचेत्धनंकुर्यात्।गतयोगेऋणं।वक्रगेन्यथा।वक्रगयोस्तयागु

गम्नागहारोच्चधनमृणंवर्षरात्रं। ऋणधनंधनऋणं। एवंकृतेग्रहोसमकलोस्यातां ३ अथग्रहाणांकुजादीनांविक्षेपानूस्व
पातलवाश्चाह नवदिनेशरसार्कदिवाकरादशहताः स्वलुबाणकलाः कुजात्॥ युगयमाष्टरसांबरभूमयोदशहताः इह
पातलवाः स्मृताः ४ नवदिनेशेति। कुजादीनांयथाक्रमं। नवदिनेशरसार्कदिवाकरादशहताः स्वधनुबाणकलाः कु
जात्। नवतिः९०। विंशत्यधिकशतं१२० षष्टि ६० विंशत्यधिकशतं१२० विंशत्यधिकशतं१२० एताबाणकलाः विक्षेपकला
भवंति। युगयमाष्टरसांबरभूमयोदशहताइहपातलवास्मृताः। चत्वारिंशत् ४० विंशतिः २० अशीतिः ८० षष्टिः ६० शतं१००
एतेपातभागाभवंति ४ अथकुजादीनांबिंबकलामाह युगाग्निनेत्रषट्कृतिरसिवेदास्तंबरमौनिधयः स्वरामाः
॥ व्योमेंदुनिघ्नानिजकर्णभक्ताकुजादितोबिंबकलाभवंति ५ चतुर्विंशतिः २४ षड्विंशत् ३६ द्विचत्वारिंशत् ४२
अष्टचत्वारिंशत् ४८ त्रिंशत् ३० एताः कलाः कुजादीनांमध्यबिंबलिप्ताभवंति। दशागुणिताएतास्त्रिन्नीयशीघ्रकर्ण
भक्ताबिंबकलाभवंति ५ अथपातस्फुटमाह भौमसूर्यसुतवाक्यतिपाताःसंस्कृताश्चलफलेनयथाते॥ स्यु
स्फुटाज्ञसितपातलवास्युःस्वीयमंदफलयुक्तिरहीनाः ६ भौमेति। भौमसूर्यसुतवाक्यतिपाताः। कुजज्ञानिष्टद्द
स्थतिपाताः। चलफलेनसंस्कृताः स्वतृतीयशीघ्रफलेनग्रहवद्दृणंधनसंस्कृताः स्फुटास्युः। ज्ञसितपातलवाः। स्वीयमंद
फलयुक्तिरहीनाः। बुधशुक्रपातभागाः। स्वद्वितीयमंदसकलफलेनस्वस्फुटयुक्तेचेत् अत्रपातभागेऋणं। तत्ररहिते
चेत् अत्रधनं। एवंकृते स्फुटयुक्तेपाताभवंति ६ अथकुजादीनांस्फुटविक्षेपचंद्रयोगागणनमाह स्वंस्व
पातेरहितस्वचरात्सोम्यभृगवोश्चलोच्चात् कृत्वादोर्ज्यानिजशरहताशीघ्रकर्णोधृवास्त्र क्षेपस्पृष्टोभवतिनिजपातानि
तव्योमगत्यानत्वास्सूर्यग्रहणविधिनासंस्कृतःशीतरश्मिः ७ स्वंस्वमिति। स्वंस्वपातेरहितस्वचरात्। स्वस्वस्फुपा
तोनस्वग्रहात्सोम्यभृगोश्चलोच्चात्। बुधशुक्रयोः स्वस्वस्फुटपातोनस्वस्वशीघ्रोच्चात्कृत्वादोर्ज्याः। दोर्ज्यामानीय। तद्दोर्ज्या
निजशरहताः स्वस्वमध्यविक्षेपगुणिताः शीघ्रकर्णोद्धृताश्च। क्षेपस्पष्टोभवति। स्वस्वत्रितीयशीघ्रकर्णभक्ताः स्फुटविक्षे

419
1918

पास्युः। ग्रहाणांचंद्रस्ययोगेनिजपतेनितोत्यर्कगत्यानत्यास्सूर्यग्रहणविधिनासंस्कृतःशीतरश्मिः। निजपातोननतसोत्तर
श्मेः सूर्यग्रहणवन्नतिविक्षेपावानीय। चंद्रबिंबग्रहबिंबयोर्योगएवमानेक्यार्धतन्मानैक्यार्धवर्गेनतिसंस्कृतचंद्रविक्षेप
वर्गाद्विशोध्यास्थित्यर्धमानीयतत्स्थित्यर्धेस्फुटयोगकालादूनिश्चेत्स्पर्शकालः। युतोमोक्षकालोभवति ७ अथ
ग्रहांतरज्ञानोपायमाह शरयोः समभिन्नगोलयोर्विवरैक्यंभवतियग्रहांतरं जनयोस्तनुखंडयोगतोयदिभेदोल
घुर्विग्रहांतरं ८ शरयोरिति। शरयोः समभिन्नगोलयोर्विवरैक्यंभवतियग्रहांतरं। समगोलास्थितयोर्भिन्नगोलास्थित
योर्ग्रहयोस्फुटविक्षेपयोरंतरंऐक्यंक्रमात्कार्यं। एवंकृतेग्रहांतरंग्रहयोरंतरमध्यंस्यात्। जनयोस्तनुखंडयोगतोयदिभे
दोलघुर्विग्रहांतरं। जनयोर्ग्रहयोर्विग्रहांतरंतनुखंडयोगतःस्वबिंबार्धयोगतःयदिलघुस्यात्तदानींभेदोभवति। बिंबार्धि
क्यंग्रहःस्वल्पबिंबग्रहंग्रसतइत्यर्थः ९ अथग्रहयोर्दिग्ज्ञानमाह असमदिशोःसमयोर्युतिभाजोर्निजनि
जबाणदिशिधुचरोस्तः। समकक्षगोरवलुयस्यशरोल्पापरदिशिसोन्यनमभ्रस्तत्स्यात् ९ असमदिशोरिति
असमदिशोः समयोर्युतिभाजोः। भिन्नदिशिस्थितयोर्युतिभाजोः। समकक्षसमकक्षयोः समयोः समदिशिस्थितयोः स
मकक्षयोः निजनिजबाणदिशित्वस्वविक्षेपदिशिधुचरोग्रहोस्तः समकक्षगोसमदिशिस्थितोग्रहोयस्यग्रहस्यशरः
विक्षेपः अल्पस्यात्। सोन्यनमभ्रस्तः अन्यग्रहात्परदिशिस्तात्। तिष्ठतिखलु॥ दक्षिणविक्षेपत्वेदुत्तरतास्थिति। उत्त
रविक्षेपत्वेदक्षिणेतिष्ठतीत्यर्थः। अंतिमे। आद्यैर्विलग्नकारप्रयोगात्उत्तरोनरमंगलमस्तीतिज्ञाप्यते ९ अथग्रहा
णांस्पर्शमोक्षज्ञानोपायमाह समकक्षयोर्ग्रहयोरुदयोयः स्फुटमनयोरुदयास्तमयेन सभवतियेनसतिग्रहभे
दसतिर्थिरत्नः कुरुलंबनपूर्वं १० समकक्षायोरिति। उदयास्तमयेनविधिना। एष्योलादित्यनेनविना। डीग
णः साध्यस्तयोर्यवं। विनाडीगणेयेसाधितेयावत्यांघटिकायांग्रहोसमकक्षास्तः तावतीघटिकांज्ञात्वातत्तद्ग्रहयोर्घ
टिकायानन्नमानीयतत्तादृग्घटिकायालंबनसंस्कारःकार्यः। नतिसंस्कृतग्रहांतरमेवविक्षेपः। विक्षेपवर्गादिस्थित्य

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

धंतिमानयेत्। तत्रास्तित्यर्धलंबनसंस्कृतग्रहयोगकालादूनंचेस्यर्क्षकालः। अमीष्टग्रासादिकंसर्वंबुधिमद्भिःगणि
तज्ञैरूहनीयं। तस्मात्सुष्ठूक्तं। लंबनपूर्वकुर्विति। अत्रश्रुतस्मृतिमल्लोकेकुर्विति। आशीर्लिलकारप्रयोगाच्चएतत्ग्रंथस्य
ठितॄणांपाढयितॄणांसर्वेषामायुरारोग्यऐश्वर्याभिवृद्ध्यात्मकंमंगलमस्तीत्यर्थः। श्रीब्रह्मदेवःकविः। ग्रंथस्यप्रकरणत्व
दस्मिन्करणप्रकाशेग्रहाध्यायेचनप्रतिपादितः कविनेति। सर्वेष्टसिद्धिः १० आसीत्यार्थिववृंदवंदित
पादांभोजद्वयोमाधुरः श्रीमद्ब्रह्मबुधोगुणैकवसतिर्ख्यातोद्विजेंद्रः क्षितौ नत्वात्तस्यसुतोंघ्रिपंकजयुगंरवंडेंदुचू
डामणेरहनैःस्पष्टमिदंचकारकरणंश्रीब्रह्मदेवःकविः ११ आसीदिति। श्रीब्रह्मदेवःकविः। स्पष्टमिदंचका
रेतिक्रियाकारकसंबंधः। श्रीब्रह्मदेवः। श्रीमान्ब्राह्मणश्रेष्ठःकविः। अतिक्रांतार्यदश्रीविद्वान्। अथवाकविरिवकविः
। भगवच्छुक्रइवात्यर्थः। अनेनएतत्करणकर्तुःभगवच्छुक्रस्यज्योतिषयादृशंप्रावीण्यंतादृशंप्रावीण्यमस्याप्यस्ती
तिप्रभातियते। पुनःकीदृशः। कस्यकुमारइत्यपेक्षायांचंद्रबुधस्यसुतः खंडेंदुचूडामणेः। खंडेंदुरर्धचंद्रः सःचूडामणि
र्यस्यः खंडेंदुचूडामणिः परमेश्वरः। तस्यांघ्रिपंकजयुगंपंकेजायतइतिपंकजकमलं। पंकजमिवांघ्रिरंघ्रिपंकजो
क्तयोर्युगंनत्वाप्रणम्यतस्यापितुर्वैभवंदर्शयति। पार्थिवेंद्रवंदितपदांभोजद्वयः पृथिव्याईश्वरःपार्थिवः सर्वभू
मीत्यादिनाजस्प्रत्ययः। पार्थिवानांवृंदः समूहःतैर्वंदितंजंघाभ्यांसुजायतइत्यंभोजंकमलंजंभोजामितिपदांभोज
तयोर्द्वयोर्यः। पार्थिवेंद्रवंदनवंदितपदांभोजद्वयंयस्यसः। तथामाधुरः। मधुरानिवासोस्यमधुरः गुणैकवसतिः। गुण
नांसौशील्यादीनांएकानिय। तीत्वसतिर्यस्मिन्सतथाद्विजेंद्रः द्विजश्रेष्ठः क्षितौख्यातः। भूमंडलेप्रसिद्धः कीर्ति
मान्। चंद्रबुधः। चंद्रबुधसंज्ञः। यआसीत्। तस्यसुतः। एतेनपितुरपिसर्वशास्त्रप्रावीण्यमस्तीतिप्रतिपादितं। ब्रह्म
देवः करणंज्योतिःशास्त्रसिद्धांतप्रकरणंचकारतेननानातंत्रजातावेकवचनंस्पष्टचकार। स्पष्टकृतवान् ११ इत्याचार्य
श्रीमन्महामाध्यमहारकश्रीमद्विश्वामित्रान्वयवारिद्राव्यारव्याने ग्रहसंज्ञेग्रहाणांयुत्यधिकारोनामनवमोध्यायः
इत्यर्णाधिकारः बिंदुदुर्लिपिविसर्गवीथिकान्यूंगपडितपदभेददूषकः हस्तवेगजडबुधिपूर्वकंक्षंतुमर्हतुसमीक्ष्यसज्ज
नाः १

421
1918